10) $C_2$ **प्रांचचतुः**; Hss. **प्रक्रमयत्य॰**. — 12) $NSM_2$ **॰मावर्तयत्वा॰**, $C_2$ **॰मावर्त्तयत्वा॰**. — 13) zu erwarten: *āhṛtya*. — 16) Hss. **वि॰**. — 19) 2, 1, 2, 20—41. — 20) $C_2$ **समिंध्य**; „*yena devā*“ MS. II, 7, 12: 91, 9. 10; vgl. TS. 5, 7, 2, c; die Gāyatrīs für einen Vaiśya anscheinend nicht in MS. II. — 21) $NSM_2$ **॰पतेन्न॰**; MS. II, 10, 1: 132, 5; vgl. KS. 19, 12. — 22) Hss. **॰राया अहरु॰**; $NSM_2$ fehlt das erste *iti*; Hss. **रात्रीरुप॰**; Formel vgl. KS. 38, 12: 113, 21—114, 3; vgl. ŚB. 6, 6, 4, 1. 2. — 23) $NSM_2$ fehlt *ata*. — 23–25) *ahani—naktam* vgl. vielleicht ŚB. 6, 7, 4, 13. — 24) 6, 1, 4, 1—17. — 26) 2, 1, 3, 12. — 27–30) die zwei der *krandavatī* folgenden Mantras, MS. II, 7, 10: 87, 14—88, 2 sind schon 6, 1, 4, 20 verwendet; vgl. auch ŚB. 6, 8, 1, 5—14. — 28) vgl. 6, 1, 4, 16. 17 und TS. 5, 2, 2, 2. — 31) $NSM_2$ **यद्युख्या**; $C_2$ **पुरीषाय**, Bed. unsicher. — 33–34) vgl. KS. 19, 12, ŚB. 6, 8, 2. — 34) $C_2$ **॰मुष्टोः** —

बोधद्वतीभ्यामुपतिष्ठते । ३५ । न प्राजापत्येनानिष्टेष्टकाः कुर्वीत । ३६ । तिस्रो रात्रीर्भृत्वेतिप्रभृत्याम्नातं दीक्षापरिमाणम् । ३७ । दीक्षिते न पुनर्वतीभिरुख्यमुपतिष्ठते । ३८ । मृन्मयीरिष्टकाश्चतुरश्रा ऋजुलेखास्त्र्यालिखिता दक्षिणावृतो ऽन्याः सव्यावृतश्च खण्डकृष्णलक्ष्मवर्जं नैर्ऋतीस्तिस्रः कृष्णास्तुषपक्वा निर्मन्थेन पचेद्दक्षिणाग्नेर्वा । ३९ । दीक्षाभ्य ऊर्ध्वं क्रमवात्सप्रँ समस्य ॥ ४ ॥

॥ अपेत वीतेति शालामुखीयदेशं जोषयते । तस्मिन्व्यामँ विधाय मण्डलं चतुरश्रँ वोद्धत्यावोक्ष्य ॥ चित स्थ ॥ परिचित स्थेत्येकविँशत्या प्रदक्षिणँ शर्कराभिः परिश्रयति । १ ॥ अग्नेर्भस्मास्यग्नेः पुरीषमसीति सिकता निवपति ॥ संज्ञानमसीत्यूषान् । २ ॥ मयि गृह्णामि ॥ यो नो अग्निः पितर इति चेष्यञ्जपति यजमानो वा । ३ । व्यूह्योषसिकतमयँ सो अग्निरिति चतसृभिर्मध्ये ऽग्नेश्चतस्रः प्राचीः समीचीरिष्टका उपदधातीडामग्न इति द्वे समीची पुरस्ताच्चिदसि ॥ परिचिदसीति द्वे समीची पश्चात् । ४ । सर्वत्रेष्टकोपधानमन्त्रेष्वन्ततस्तया देवतयेत्यनुषजति । ५ ॥ लोकं पृण छिद्रं पृणेत्येतया त्रयोदशभिश्चितिँ संपूरयति ॥ ता अस्य सूददोहस इत्यनुषङ्गः । ६ । चित्यां चित्याँ हिरण्यशकलमुपास्यति । ७ ॥ पृष्टो दिवीति चात्वालदेशात्पुरीषेण चितिँ संछादयति । ८ । एवं प्रथमे गार्हपत्यस्य पञ्च चितीरुपदधाति । तिस्रो द्वितीय । एकां तृतीये । ९ । संचिते ॥ समितँ संकल्पेथामिति चतुर्भिरुख्यं निवपति । १० ॥ मातेव पुत्रमित्युखाँ विमुञ्चति । ११ । न रिक्तामवेक्षेत । १२ । सिकताभिः पूरयित्वा निदध्याद्दध्ना घृतेन मधुना वा । १३ ॥ यदस्य पारे रजस इति शिक्यमादत्ते । १४ । दक्षिणापरमवान्तरदेशँ यन्ति । १५ । स्वकृत इरिणे नैर्ऋतीरुपदधात्यसुन्वन्तमयजमानमिच्छेति तिसृभिः पराङ् पराङ् । १६ । न तयादेवतं करोति । १७ ॥

---

[37]) MS. III, 4, 6: 52, 11—53, 3. — [38]) $C_2$ **दीक्षिणेनष्टे**: *punarvatībhir* = 6, 1, 4, 12?, zu erwarten wäre *sannavatībhir* wie 6, 1, 4, 17, vgl. auch 6, 1, 4, 24. — [39]) N S $M_2$ **मृण्मय**, $C_2$ **मृन्मृज्य**; Hss. **चतुरस्रा**; N **°कृष्णं लक्ष्म°**, S $M_2$ **°कृष्णां लक्ष्म°**, $C_2$ **°कृष्णा अलेष°**; vgl. ŚB. 8, 7, 2, 16. 17 und MS. III, 2, 4: 19, 19. 20.

5 (vgl. MS. II, 7, 11—12; III, 2, 3. 4; Āp. Ś. 16, 14—19): [1]) $C_2$ **°मुखीये**, **°नव्यायामं**; Hss. **चतुरस्रँ**; vgl. MS. III, 5, 3. — [3–4]) $C_2$ **यजमानो विद्वेष°**. — [3]) MS. I, 6, 1: 86, 5. 6; 85, 18—86, 1; vgl. TS. 5, 7, 9, ŚB. 7, 4, 1, 1. 2, KŚ. 17, 3, 27, Āp. Ś. 16, 21, 6—8. — [4]) N S $M_2$ **°सिकताम°**. — [6]) MS. II, 8, 1: 106, 3—6. — [8]) u. a. MS. II, 13, 11: 161, 14—17; vgl. TS. 5, 6, 6, 4. — [9]) vgl. TS. 5, 2, 3. 6. 7. — [10]) MS. III, ŚB., KS., TS., Āp. Ś. *saṃnivapati*. — [12]) N S **°मवेक्षते**, $M_2$ **°मवेक्ष्यते**. — [12 und 13]) vgl. MS. III 2, 7: 26, 12—16. — [14]) vgl. TS. 5, 2, 4, 2. — [17]) ŚB. 7, 2, 1, 12. —

यं ते देवी निर्ऋतिराबबन्धेति जालमिष्टकास्वध्यस्यति । १८ । रुक्मसूत्रमनुप्रहृत्यासन्ध्याभिविक्रमयति । १९ ॥ यदस्य पारे रजस इत्युदकुम्भेनेष्टकाः प्रसव्यं त्रिः परिषिञ्चन्पर्येति । निधाय त्रिरपरिषिञ्चन्प्रतिपर्येति । २० ॥ भूत्यै नम इत्युक्त्वावर्तते । २१ ।

शं नो देवीरभिष्टय आपो भवन्तु पीतये ।
शँ योरभिस्रवन्तु नः ॥
शं न आपो धन्वन्याः शं नः सन्त्वनूप्याः ।
शं नः समुद्रा आपः शमु नः सन्तु कूप्याः ॥
शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
शं न इन्द्रश्चाग्निश्च शं नो विष्णुरुरुक्रमः ॥

इति तिसृभिः परोगोष्ठं मार्जयन्ते । २२ । अनपेक्षमाणाः प्रत्यायन्ति । २३ ॥ निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठते । २४ । प्रायणीयाप्रभृति सिद्धमोपसद्भ्यः । २५ । षडुपसदः प्रवर्ग्यवत्यः । २६ । अनूपसदमग्निं चिन्वीत । २७ । प्रथमायामुपसदि पूर्वाह्णिकीं कृत्वा यूपमक्ष्केति । २८ । अग्रेण प्राग्वँशं त्रिषु प्रक्रमेष्वपरिमिते वावकाशे पृष्ठ्याशङ्कुं निहत्य वेदादानप्रभृति वेदिँ विदधाति यथा सोमे । २९ । ऊर्ध्वबाहुना यजमानेन वेणुं प्रमायोत्तरवेदिदेशे सप्तपुरुषमग्निँ विदधाति । ३० । तस्य चतुःपुरुष आत्मा पुरुषमात्राणि पक्षपुच्छानि । ३१ । अरत्निं पक्षयोरत्युपदधाति प्रादेशं पुच्छे । ३२ । तुर्यपुरुषँ शिरो विधाय विहितस्य मध्यदेशे दर्भस्तम्बे हिरण्यं निधाय ॥ सजूरब्दो आयवोभिरित्यभिजुहोति । ३३ ॥ प्रजापतिष्ट्वा सादयतु पृथिव्याः पृष्ठे तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति विहितस्य मध्यदेशे पृथिवीमभिमृशति । ३४ । दक्षिणतः पक्षस्योद्योजनमन्तर्याममिति सीरे युगवरत्राणि संबध्नाति । ३५ ॥ पूषा युनक्तु सविता युनक्त्विति तिसृभिर्युज्यमानमनुमन्त्रयते । ३६ । षड्युक्तेन कृषति द्वादशयुक्तेन वा । ३७ ॥ उदस्थाद्गोजिदश्वजिदित्यु-

---

[19]) unsicher: $C_2$ °संध्याभिर्हीक्रमयति; vgl. auch BŚ. 10, 22. — [20]) $C_2$ निधायं, vgl. 1, 7, 6, 52. 53; 6, 2, 4, 8. — [22]) [b]) Hss. शंतनूप्याः; [c]) Hss. शं वरुणः; $M_2$S परोगोष्टं, S geändert in °गोष्टं; Mantras vgl. KS. 38, 13 (VS. 36, 12), KS. 2, 1, VS. 36, 9. — [24]) $C_2$ °त्यिंद्रिया, NS °त्यिंद्या. — [25]) 2, 1, 3, 20—2, 2, 1, 13. — [26–27]) vgl. Āp. Ś. 16, 35, 6—9. — [28–29]) vgl. 2, 2, 1, 51. 52. — [31–32]) fehlen in $M_2$, außer: *prādeśaṃ puche*; vgl. KS. 20, 3: 20, 20. — [33]) NS$M_2$ fehlt विहि°; $C_2$ °ब्द आयव°, $M_2$ °ब्दे अयवे°; vgl. MS. II, 12, 3: 146, 2 mit III, 4, 4: 49, 5—15. — [34]) vgl. MS. II, 8, 14: 117, 15, IV, 9, 16 und BŚ. 10, 23: 22, 4. — [35]) NS $M_2$ शीरे, °वरत्नानि, $C_2$ °वर्त्राणि. — [36]) vgl. ŚB. 7, 2, 2, 4—6. — [38]) NS °द्गोजिदित्युक्र(य)ति, $M_2$ °द्गोजित्युक्रति अश्व°, vgl. Āp. Ś. 16, 18, 6, $C_2$ °दश्व-

च्छितमनुमन्त्रयत ॥ उष्टारयोः पील्वयोरित्यनडुहः । ३८ ॥ लाङ्गलं पवीरवमिति पञ्चमीमामिन्द्र हस्तच्युतिमिति षष्ठी । तासामेकैकया द्वे द्वे सीते कृषति । ३९ । दक्षिणार्धात्पश्चस्योपक्रम्य मध्येन सीतां करोत्युत्तरस्मात्पश्चान्तात्प्रदक्षिणावृता दक्षिणां पूर्वामुदीचीमपराम् । ४० । एवं तिस्रस्तिस्रः सीताः कृषति । दक्षिणस्याः श्रोणेरध्योत्तरस्मादंसात्पुच्छादध्या शिरस । उत्तरस्याः श्रोणेरध्या दक्षिणस्मादंसात् । ४१ ॥ विमुच्यध्वमघ्न्या देवयाना इति दक्षिणाप्राचो विमुञ्चति । ४२ । तानध्वर्यवे ददाति सीरं च । ४३ । ॥ ५ ॥

ओषधीरारण्या ग्राम्याश्च सर्पिषा संसृज्य ॥ या ओषधयः प्रथमजा इति चतुर्दशभिः सर्वमग्निं वपति । १ । या न विन्देत्ताभ्यो यवान्मधूद्युतान्वपेत् । २ । शेषेणोप्तमग्निमुपतिष्ठेत । ३ । दिग्भ्यो लोष्टान्बहिर्वेदेर्मा नो हिंसीज्जनितेति चतसृभिर्मध्ये ऽग्नेः समस्यति । ४ । यां जनतां कामयेत चोधुका स्यादितीषमूर्जमहमित आदीति तस्या दिशो लोष्टानाहरेत् । ५ ॥ कामं कामदुघे धुक्ष्वेति सीतां सीतामभिमृशति । ६ । गोयुगेन चात्वालं विदधाति । ७ । दशपदामुत्तरवेदिं मध्ये ऽग्नेर्व्याघारणान्तां कुर्वीत । ८ ॥ चित स्थ ॥ परिचित स्थेत्यग्निं प्रदक्षिणं शर्कराभिः परिश्रयति । ९ ॥ अग्ने तव श्रवो वय इति षड्भिः सिकता निवपति । १० ॥ आप्यायस्व ॥ सं ते पयांसीति सौमीभ्यां व्यूहति शिरसि पक्षपुच्छानां चाप्यया लोका लोका मध्ये ऽग्नेः स्वयमातृण्णालोके । ११ । उत्तरं पुच्छाप्ययं प्रत्यग्नेराक्रमणम् । १२ । अग्रेण शालामुखीयं रोहिते चर्मण्यानडुहे प्राग्ग्रीवे लोमतश्चितीनां प्रथमेष्टकाः समादधाति । १३ । अनुवाचयति ॥ चित्यग्निभ्य इत्युपांशु ॥ प्रणीयमानेभ्यो ऽनुब्रूहीत्युच्चैः । १४ । सकृदुक्तायां चर्मणाहरन्त्यश्वमग्रतो नयन्ति । १५ । श्रोणेः पश्चाच्चर्म निदधाति । १६ । समयोत्तरवेदिमभ्यस्थां विश्वाः पृतना इति दक्षिणेन पादेन स्वयमातृण्णालोके ऽश्वमाक्रमयत्यपर्यावर्तयन्परिक्रमयति । १७ । प्रत्यवनीयाश्वं कुम्भेष्टका द्वादशोदकेन पूरयित्वा ॥ समन्या यन्तीतिप्रभृतिभिर्द्वादशभिर्मध्यमासु सीतासूपदधाति । कुम्भं कुम्भी च द्वे द्वे लोकेषु चतस्रो मध्ये । १८ ॥ आपो हि ष्ठेति तिस्रः

---

जिदि- । दश्वजित्यु०; $C_2$ ०त्यनुद्रुहौ, NS ०त्यनुडुहौ, $M_2$ ०त्यनुडुहं; vgl. aber ŚB. 7, 2, 2, 6; 4, 29, wo von zwei Ochsen die die Rede ist. — 40) NS$M_2$ ०त्पश्चयोरूप०; $C_2$ दक्षिणापूर्वामु०, NS$M_2$ दक्षिणामु०. — 42) Hss. ०प्रांचो; vgl. ŚB. 7, 2, 2, 21. — 43) $M_2$ शिरं.

6 (vgl. MS. II, 7, 13. 14; III, 2, 5; Āp. Ś. 16, 19—22): 2) $C_2$ यां न, NS$M_2$ या या न; $C_2$ ०न्वपेत; NS$M_2$ ०न्मधुघृताक्तानृगवशेषे०. — 4) vgl. ŚB. 7, 3, 1, 13—24. — 8) vgl. 2, 2, 1, 54 und 1, 7, 3, 31. — 9) vgl. 6, 1, 5, 1. — 11) $C_2$ *lokā* einmal; zu ändern in *cāpyayaloke loke*? — 12) vgl. ŚB. 7, 3, 2, 17. — 13) NS$M_2$ ०ण्यानुडुहे, $C_2$ ०ण्यानद्रुहे; Hss. प्राग्रीवे; vgl. ŚB. 7, 3, 2, 1—2. — 18) $C_2$ कुंभं कुभीयं. —

कुम्भेष्टका: समन्वीक्षमाणो जपति । १९ । नैवारं चरुं पयसि शृतं ॥ दिवि श्रयस्वेति दक्षिणतः पुरस्तात्स्वयमातृण्णालोकस्योपदधाति । २० । ॥ ६ ॥

पदे पुष्करपर्णं प्रत्यग्द्वारमधस्तान्नाभि ॥ तपो योनिरसीत्युपदधाति । १ । पुष्करपर्णे रुक्मं प्रत्यक्पाशमुपरिष्टान्निर्बाधं ॥ ब्रह्म जज्ञानमित्युपदधाति । २ । रुक्मे सौवर्णं पुरुषं प्राक्शिरसमुत्तानँ ॥ हिरण्यगर्भ इति द्वाभ्यामुपदधाति ॥ द्रप्सश्चस्कन्देत्यभिमृशति । ३ ॥ नमो ऽस्तु सर्पेभ्य इति तिसृभिः सर्पनामभिरुपतिष्ठते । ४ ॥ कृणुष्व पाज इति पञ्चभिर्व्याघारयति यथा नाभिम् । ५ । कार्ष्मर्यमयीं स्रुचं घृतस्य पूर्णामयमग्निः सहस्रिणो ॥ ऽग्नेष्ट्वा तेजसा सादयामीति दक्षिणत उपदधात्यौदुम्बरीं दध्नः पूर्णां ॥ भुवो यज्ञस्येन्द्रस्य त्वौजसा सादयामीत्युत्तरत उपदधाति । ६ । स्वयमातृण्णाँ शर्करामश्वेनोपघ्राप्य ॥ भूरित्यभिमन्त्रयते । ७ ॥ ध्रुवासि धरुणेति सयजुषं करोति । ८ ॥ प्रजापतिष्ट्वा सादयत्विति पर्यायेणोपदधाति पुरुषे स्वयमातृण्णां ब्राह्मणेन सहाविदुषा । ९ । शिरः प्रत्यातृण्णँ स्यात् । १० । अभिप्राण्य ॥ चितिं जुहोमीत्यदाभ्यातृणे ऽभिजुहोति । ११ ॥ पृथिवीमाक्रमिषमिति यजमानो जपति । १२ । अविदुषे वरं ददाति । १३ ॥ तेजो ऽसि तेजो मे यच्छेति पूर्वां हिरण्येष्टकामुदपुरा नामासीत्यपरां मण्डलाँ ॥ यास्ते अग्न आर्द्रा योनय इति दक्षिणां कुलायिनीमुत्तरं लोष्टं दूर्वामिश्रं ॥ काण्डात्काण्डात्प्ररोहन्तीति द्वाभ्यामुपदधाति यथाप्नुयुर्दूर्वाः स्वयमातृण्णाम् । १४ । पूर्वां हिरण्यमूर्ध्नीं वामभृतं । काचावँसयोः स्याताँ ॥ यास्ते अग्ने सूर्ये रुच इति द्वाभ्यामुपदधाति । १५ ॥ विराड् ज्योतिरधारयद्भूरसि भुवनस्य रेत इति रेतःसिचम् । १६ ॥ स्वराड् ज्योतिरधारयत्सूरसि सुवनस्य रेत इति द्वितीयां । प्रथमायां चितावपुत्रस्य । पुत्रिणो द्वितीयामुत्तमायाम् । १७ ॥

---

18–20) MS. II, 13, 1; III, 4, 10; vgl. TS. 5, 6, 2, Āp. Ś. 16, 32, 5—33, 4; nur BŚ. 10, 28 hat die Kumbheṣṭakās an dieser Stelle.

**7** (vgl. MS. II, 7, 15—17; III, 2, 6—8; Āp. Ś. 16, 22—27): [1]) $C_2$ NS **॰न्नाभिं**, vgl. 6, 1, 1, 25. — [2]) vgl. KS. 20, 5: 23, 6. — [3]) vgl. ŚB. 7, 4, 1, 18. — [5]) NS$M_2$ **नाभि**, vgl. 1, 7, 3, 31; 6, 1, 6, 8. — [6]) Hss. **॰रीमुत्तरतो दध्नः**. — [7–14]) vgl. 6, 2, 1, 10—16; 6, 2, 3, 10—16. — [7]) Formel vgl. TS. 5, 5, 5, 3, MS. III, 4, 7. — [9]) MS. II, 8, 14: 117, 15—118, 8; vgl. KS. 20, 6: 24, 10. 11, TS. 5, 2, 8, 2, BŚ. 10, 31: 29, 1. 6. — [11]) vgl. TS. 5, 5, 5, 2. 3; $C_2$ **॰दाभ्यांतृ॰**, NS$M_2$ **॰दाभ्यस्तृ॰**; *adābhyā* vgl. MS. III, 3, 9: 43, 3. — [12]) vgl. TS. 5, 6, 8, 1. — [13]) in TS., Āp. Ś. und BŚ. ist der Unwissende Subjekt. — [14]) [a]) MS. III, 4, 7: 54, 11. 12; [b]) MS. II, 8, 14: 117, 6—15; vgl. TS. 5. 3, 9, 2; [c]) MS. III, 4, 7: 53, 18; [d]) vgl. ŚB. 7, 4, 2, 13. — [15]) $C_2$ **॰वंशयोः**, $M_2$ **॰वँ अग्नेसयोः**; vgl. KS. 20, 6: 25, 3. 4. — [16]) S **इति द्वाभ्यामुपदधाति**. — [17]) S **विराट्**; NS$M_2$ **भुवनस्य**. —

सम्राड् ज्योतिरधारयदिति ज्योतिषो धृतिं पूर्वाँ रेतःसिग्भ्याम् । १८ ॥ बृहस्पतिष्ट्वा सादयत्विति विश्वज्योतिषम् । १९ । तस्याः पूर्वां घर्मेष्टकामरण्ये ऽधीतेनानुवाकेन । २० ॥ अषाढासि सहमानेत्यषाढाम् । २१ । दध्ना मधुमिश्रेण पृषतं कूर्मं ॥ मधु वाता ऋतायत इति तिसृभिरभ्यनक्त्यँपां त्वा गह्मन्त्सादयामीति पुरस्तात्प्रत्यञ्चमुपदधाति । २२ । प्रादेशमात्रमुलूखलमुसलमौदुम्बरम्

यच्चिद्धि त्वं गृहे गृह उलूखलक युज्यसे ।
इह द्युमत्तमँ वद जयतामिव दुन्दुभिः ॥

इत्यभिमन्त्र्य तस्मिन्व्रीहीनवहन्ति । २३ ॥ इदँ विष्णुर्विचक्रम इति द्वाभ्यामुपदधाति दक्षिणतः पुरस्तात्स्वयमातृण्णायाः ॥ प्र तद्विष्णुरित्युदञ्चं मुसलम् । २४ ॥ नक्तोषासा ॥ स्यूता देवेभिरित्यनुवाकशेषेणोखामुत्तरतः पुरस्तात्स्वयमातृण्णाया यावत्युलूखलम् । २५ ॥ अग्ने युक्ष्वा हि ये तवेति द्वाभ्यामग्निँ योजयित्वा । दध्ना मधुमिश्रेण ॥ समित्स्रवन्तीति शिरसां छिद्राणि पूरयित्वा हिरण्यशकलानप्यस्यत्यृँचे त्वेति कर्णे ॥ रुचे त्वेति सव्ये ॥ भासे त्वेत्यक्षिणि ॥ ज्योतिषे त्वेति सव्ये ॥ ऽभूदिदमिति नासिकायामँग्निस्तेजसेति सव्यायाँ ॥ रुक्मो वर्चसेत्यास्ये । २६ ॥ सहस्रदा असि सहस्राय त्वेति विकर्तने ॥ आदित्यं गर्भमित्युखायां पुरुषशीर्षमुपदधाति प्रत्यङ्मुखमवाङ्छेदम् । २७ । अभित इतराणि परिहारँ स्पृष्ट्वेत्युखायाँ श्रवणैर्हनुभिः प्रतिष्ठितानि ॥ वातस्य जूतिमित्यश्वशिरः पुरस्तादँजस्रमिन्दुमित्यृषभस्य पश्चात्त्वँष्टुर्वरूत्रीमिति वृष्णेर्दक्षिणतो ॥ यो अग्निरग्नेरिति बस्तस्योत्तरतः । २८ ॥ इमं मा हिँसीर्द्विपादमित्युत्सर्गैर्यथोपहितमेकैकेनोपतिष्ठेत । २९ । पुरुषशिरसो ऽक्षिणि ॥ चित्रं देवानामित्यर्धर्चेनाभिजुहोत्याँप्रा द्यावापृथिवीति सव्ये । ३० । एकं चेदजशिरः स्यादुखायामुपधायोपधानैरुत्सर्गैर्लोकानुपतिष्ठेत । परिहारँ वा लोकेषु तैर्मन्त्रैरुखायामुपधायोपधानैरुत्सर्गैरुपतिष्ठते । ३१ । पशुशिराँसि स्वयमातृण्णां चान्तरेण न व्यवेयाद्यदि व्यवेयात्त्वँ यविष्ठेति जपेत् । ३२ । ॥ ७ ॥

---

18) NSM$_2$ घृति. — 19) vgl. 6, 2, 1, 17; 2, 8. — 20) MS. IV, 9, 14, TĀ. 4, 17. — 22) C$_2$ घृपंतं, M$_2$ प्रेषतं; Hss. statt °न्त्सा°: °त्सा°; vgl. TS. 5, 2, 8. 6. 7. — 23) NS M$_2$ fehlt: *vada*; Mantra ṚV. 1, 28, 5. — 24) MS. I, 2, 9: 19, 12. — 25) NSM$_2$ यावन्मु°. — 26–27) Sūtratrennung unsicher, vgl. ŚB. 7, 5, 2, 13, KS. 20, 8; MS. *śakalāny*, ŚB. 7, 5, 2, 8 *śakalān*; vgl. TS. 5, 2, 9, 3; die Bed. von *vikartane* entgeht mir. — 28) *parihāraṁ spṛṣṭvā* habe ich in keinem Brāhmaṇa gefunden; vgl. KS. 20, 8: 27, 15. 16, ŚB. 7, 5, 2, 15. 16. — 30) MS. I, 3, 37: 43, 8—10; vgl. TS. 5, 5, 3, 3. — 31) S fehlt: *lokān - - - - - - utsargair*; vgl. KS. 20, 8: 27, 19—21. — 32) MS. II, 13, 11: 162, 1.

उत्तरस्मिन्नँसे पुरुषचितिमुपदधाति । १ ॥ मा छन्द इतिप्रभृतयः पर्यायास्तेषामेकैकेन पर्यायेण युगपत्तिस्रस्तिस्र उपदधाति । ध्रुवाः सीदतेत्यन्तेन । २ । उत्तरार्धात्सर्पशिरः सर्पनामभिः पराचीनमुपदधात्यनुदिशेद्वा नोपदध्यात् । ३ ॥ अपां त्वेमन्त्सादयामीति- प्रभृतिभिरपस्या दिक्षु पूर्वार्धादुपक्रम्य प्रदक्षिणं पञ्च पञ्चोपदधाति ॥ गायत्रेण त्वा छन्दसा सादयामीतिप्रभृतिभिश्छन्दस्या उत्तरत उपदधाति । ४ ॥ अयं पुरो भूरितिप्रभृतयः पर्यायास्तेषामेकैकेन पर्यायेणैकैकां दश दश प्राणभृत उपदधाति ' दक्षिणस्मिन्नँसे सव्यायाँ श्रोणौ दक्षिणायाँ श्रोणौ सव्ये ऽँसे मध्ये पञ्चमम् । ५ ॥ प्राची दिग्वसन्त ऋतुरिति पर्यायाः सँयत उपदधाति यथा प्राणभृतः । ६ । अवकास्तूतव्या ॥ मधुश्च माधवश्चेति- प्रभृतयः पर्यायास्तेषामेकैकेन पर्यायेण युगपद्द्वे द्वे चित्यां चित्यामिष्टके उपदधाति चतस्रो मध्यमायाम् । ७ ॥ अग्नेरन्तःश्लेषो ऽसीति यथर्तु सर्वत्रानुषजति ध्रुवे सीदतमित्यन्तेन । ८ ॥ अग्नेर्यान्यसीति दश सँयान्यस्तासां द्वे द्वे चित्यां चित्यामिष्टके उपदधाति । ९ ।

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् ।
अस्थूरि नौ गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सँशिशाधि ॥

इत्यृषभेण चित्यां चित्यामिष्टका उपदधात्यृजुलेखाः पुच्छे समं पश्चात्प्राची पुरस्तात्प्रतीचीमु- पदधाति ' दक्षिणावृतो दक्षिणत आत्मन्युदग्द्वाराः प्रत्यग्द्वाराः पक्षे ' सव्यावृत उत्तरत

---

8 (vgl. MS. II, 7, 18—20; 13, 11—13; III, 2, 8; 5, 1; Āp. Ś. 16, 27. 28. 32—35): ²) vgl. KS. 39, 4 : 122, 14—123, 2 mit MS. II, 8, 3 : 108, 11—19 und vgl. 6, 2, 1, 18 (Mān. śulba, uttareṣṭake 3er khaṇḍa: *puruṣacitim upadadhāti ṣaṭ triṁśatam*). — ³) vgl. 6, 1, 7, 4, also: MS. II, 7, 15 : 97, 1—6; vgl. MS. III, 2, 6, TS. 5, 2, 9, 5. 6, KS. 20, 5. — ⁵) MS. II, 7, 19 zu lesen zweimal: *gṛhṇāmi prajābhyo*ˇ, zweimal *gṛhṇāmi prajābhya*ˇ. — ⁵⁻⁶) $M_2$ **पंचमँ**; N **पंचमं द्यां बाह्यामक्ष्णयोपदधातीति व्याख्यातं**; S **पंचमँ** und oben am Rande der Seite: **बाह्यां बाह्यामक्ष्णयोपदधातीति व्याख्यातं**; NS **यथा प्राणभृतोत्तरामंतरां**; da diese Bestimmungen doch nicht in $C_2 M_2$ ausgefallen sein können, läßt sich vermuten, daß es spätere Einfügungen sind, wsch. aus dem Āp. Ś.; auch hat MS. III *akṣṇayā sādayati*, nicht *upadadhāti*, und ist das Hinlegen der Iṣṭakās „*akṣṇayā*" schon in der Reihenfolge im Texte gegeben. — ⁶) $C_2$ **पर्यायैः**. — ⁷⁻⁹) *catasro - - - - upadadhāti* fehlt in $M_2$; in S kommt es zweimal vor. — ⁷⁻⁸) MS. II, 8, 12; III, 3, 3: 35, 9—20; Āp. Ś. 16, 24, 9—11; *dhruve sīdatam ity antena* vgl. ŚB. 7, 4, 2, 29 usw. — ⁹) MS. II, 8, 13: 116, 18—117, 3; vgl. Āp. Ś. 16, 24, 8, TS. 5, 3, 10, 1. 2. — ¹⁰) $C_2 N M_2$ **चेकितानां**, S **॰ना**; MS. IV, 14, 15: 240, 2, KS. 40, 2: 136, 1, TS. 5, 7, 2, 1; *purastāt pratīcīm* nur NS; $NM_2$ statt **पक्षे '**:

आत्मनि । दक्षिणाद्वाराः प्राग्द्वाराः पक्षे । १० । लोकंपृणया चितिँ संपूरयति । ११ ॥ अग्ने धामानीति स्वयमातृणालोके चितिं चितिमभिमृशति । १२ ॥ अग्ने कह्येति स्वयमातृणालोके चितिं चितिमभिजुहोति । १३ ॥ या त इषुर्युवा नामेति सर्वत्रानुषजति । १४ ॥ यो अप्स्वन्तरग्निरित्येकैकया चितिहोमाननुमन्त्रयते द्वाभ्यामुत्तमम् । १५ । अश्वँ श्यावमालभ्य ॥ पृष्टो दिवीति चात्वालात्पुरीषेण चितिँ संछादयति संछादयति । १६ । ॥ ८ ॥

॥ इति चयने प्रथमो ऽध्यायः ॥

---

**वापदो**, S: **वापदा**; $C_2$ fehlt: °*ni* । *dakṣiṇā*° bis in [12]) °*loke*; vgl. MS. III, 4, 7, TS. 5, 7, 8, 3, ŚB. 10, 2, 1, 8—11. — [16]) Hss. **श्यावमा°**, vgl. KS.22, 8: 64, 17, ŚB. 8, 1, 4, 10; 8, 7, 3, 1—8.

आपराह्णिक्यौ प्रवर्ग्योपसदावुपेत्य वसन्ति । १ । ऊर्ध्वं पूर्वाह्णिकीभ्यामाश्विनीभिर्द्वितीयां चितिमारभन्ते ॥ ध्रुवक्षितिर्ध्रुवयोनिरितिप्रभृतिभिः पञ्च लोकेषु । २ । आश्विनीरृतव्या अनूपधीयन्ते ॥ सजूरृतुभिरितिप्रभृतिभिः पञ्च ॥ सजूर्देवैर्वयुनाधैरिति सर्वत्रानुषजति । ३ । ऋतव्या वायव्या अनूपधीयन्ते ॥ प्राणं मे पाहीतिप्रभृतिभिः पञ्च । ४ । वायव्या अपस्या अनूपधीयन्ते ॥ ऽपः पिन्वेतिप्रभृतिभिः पञ्च । ५ । अपस्या वयस्या अनूपधीयन्ते ॥ क्षत्रँ वयो मयन्तं छन्द इति चतस्रः पूर्वार्धे ऽप्ययेषु पञ्च पञ्च । ६ । व्याख्याताः सार्वचितिक्यो लोकंपृणा पुरीषं च । ७ । आपराह्णिक्यौ प्रवर्ग्योपसदावुपेत्य वसन्ति । ८ । ऊर्ध्वं पूर्वाह्णिकीभ्यां तृतीयां चितिमारभन्ते । ९ । स्वयमातृण्णाँ शर्करामश्वेनोपघ्राप्य ॥ भुव इत्यभिमन्त्रयते । १० ॥ इन्द्राग्नी अव्यथमानामिति सयजुषं करोति । ११ ॥ विश्वकर्मा त्वा सादयत्विति पर्यायेणोपदधाति । १२ । नात्राविद्वान्न वरदानम् । १३ । अभिप्राण्यापान्य ॥ चितिं जुहोमीत्यदाभ्यातृण्णे ऽभिजुहोति । १४ ॥ अन्तरिक्षमाक्रमिषमिति यजमानो जपति । १५ ॥ ज्योतिरसि ज्योतिर्मे यच्छेति पूर्वाँ हिरण्येष्टकामपराजिता नामासीत्यपरां मण्डलाम् । १६ ॥ विश्वकर्मा त्वा सादयत्विति विश्वज्योतिषम् । १७ ॥ राज्ञ्यसि प्राची दिगितिप्रभृतिभिः पञ्च दिश्या लोकेषु । १८ ॥ आयुर्मे पाहीतिप्रभृतिभिरप्ययेषु दश पूर्वार्धे ' द्वादश द्वादशेतरेषु । १९ ॥ मूर्धासि

---

**1** (vgl. MS II, 8, 1—6; III, 2, 9—10; Āp. Ś 17, 1—2): [1]) NS$M_2$ **अपरा°**. — [2]) $C_2$ **°मारभते**; so auch 6. 2, 1, 9. 22; 2, 1. — [5]) NS **अपः**, $M_2$ **आपः**. — [6]) $C_2$ **पंचोपदधाति**; vgl. KS. 20, 10: 30, 6. — [7]) 6, 1, 8. 11. 16. — [8]) Hss. natürlich **चापरा°**, also nicht zu sehen ob **अप°** oder **आप°** gemeint ist; so auch 6, 2, 1, 21. 27; vgl. z. B. 2, 2, 2, 1; 6, 2, 1, 1: 4, 15. 21. — [10–16]) vgl. 6, 1, 7, 7—14 und Bem. — [12]) MS. II, 8, 14: 118, 1 wird wohl *viśvakarmā tvā* zu lesen sein. — [14]) $C_2$ **अभिव्यवाण्य**, NS$M_2$ **अभिप्राण्यपान्य**; vgl. BŚ. 10, 39: 37, 20. — [17]) vgl. 6, 1, 7, 19. — [19]) MS. III, 2, 9: 30, 7 *bṛhatī*; ŚB. 8, 3, 2, 14; 3, 1 nennt die 10 *prāṇabhṛtaḥ*, die 36 *chandasyāḥ*. —

राडितिप्रभृतिभिरादित्यधाम्नीः सप्त पुरस्ताद्यन्त्री राडितिप्रभृतिभिरङ्गिरोधाम्नीः सप्त पश्चात् । २० । व्याख्याताः सार्वचितिक्यो लोकंपृणा पुरीषं च । २१ । आपराह्णिक्यौ प्रवर्ग्योपसदावुपेत्य वसन्ति । २२ । ऊर्ध्वं पूर्वाह्णिकीभ्यामक्ष्णयास्तोमीयाभिश्चतुर्थीं चितिमारभन्त ॥ आशुस्त्रिवृदिति पुरस्ताद्व्योमा सप्तदश इति दक्षिणतो ॥ भान्तः पञ्चदश इत्युत्तरतो ॥ धरुण एकविँश इति पश्चाद्गर्भाः पञ्चविँश इति मध्ये । पञ्चदश शिष्टास्तिस्रस्तिस्रो लोकेषूपदधाति । २३ । सृत उपदधात्यग्नेर्भागो ऽसीति पुरस्तादिन्द्रस्य भागो ऽसीति दक्षिणतो ॥ नृचक्षसां भागो ऽसीत्युत्तरतो ॥ मित्रस्य भागो ऽसीति पश्चाददित्या भागो ऽसीति मध्ये । शिष्टाः पञ्चानूपदधाति । २४ ॥ एकयास्तुवत प्रजा अधीयन्तेति सप्तदश स्पृष्टीर्मध्य उपदधाति । २५ ॥ ऋतूनां पत्नीति पञ्चदश व्युष्टीस्तिस्रस्तिस्रो लोकेषूपदधाति । २६ । व्याख्याताः सार्वचितिक्यो लोकंपृणा पुरीषं च । २७ । आपराह्णिक्यौ प्रवर्ग्योपसदावुपेत्य वसन्ति । २८ । ऊर्ध्वं पूर्वाह्णिकीभ्याम् ॥ १ ॥

असपत्नयोत्तमां चितिमारभन्त ॥ अग्ने जातान्प्रणुदा नः सपत्नानिति पुरस्तात्सँहसा जातान्प्रणुदा नः सपत्नानिति पश्चाच्चतुश्चत्वारिँशी स्तोमो वर्चो द्रविणमिति दक्षिणतः सादयति ॥ षोडशी स्तोम ओजो द्रविणमित्युत्तरतो ॥ ऽग्नेः पुरीषमसीति पुरीषवतीं पश्चात्स्वयमातृण्णायाः । १ ॥ एवश्छन्द इति चत्वारिँशतँ विराजो ऽप्ययेषु दश दश । २ ॥ रश्मिना क्षयाय क्षयं जिन्वेति त्रयस्त्रिँशतँ स्तोमभागा दिक्षु । पूर्वार्धादुपक्रम्य प्रदक्षिणँ सप्त सप्त पञ्च मध्ये । ३ ॥ राज्ञ्यसि प्राची दिगितिप्रभृतिभिः पञ्च नाकसदो लोकेषु । ४ ॥ अयं पुरो हरिकेश इति नाकसदामुपरिष्टात्पञ्चचूडाः । पश्चात्प्राचीमुत्तमाम् । ५ ॥ प्राच्या त्वा दिशा सादयामीति क्लृप्तीरुपदधाति शिरसि पक्षपुच्छेषु मध्ये पञ्चमीम् । ६ । विहरन्नेव रेतःसिचमुपदधाति । ७ ॥ परमेष्ठी त्वा सादयत्विति विश्वज्योतिषम् । ८ । ऋतव्ये उपधाय ॥ पुरोवातेतिप्रभृतिभिः पञ्च वृष्टिसनीर्लोकेषु । ९ । सँयान्ये उपधाय वाच उपदधात्यम्बा च बुला चेति सप्त पूर्वार्धे । १० ॥ सलिलाय त्वेतिप्रभृतिभिरादि-

---

[20]) $M_2$ ॰धाम्नाः beide Male, vgl. MS. III. — [21]) S $M_2$ ॰पृणाः. — [23]) Name: TS. 5, 3, 3, 1. — [25]) $C_2$ शिष्टोर्म॰, N शिष्टार्म॰, S शिष्टाः, $M_2$ सिष्टा. — [26]) MS. II, 13, 10; vgl. TS. 5, 3, 4, 7.

2 (vgl. MS. II, 8, 7—11. 13; 12, 4—6; 13, 3—8; III, 2, 10; 3, 1. 2; 4, 6; Āp. Ś. 17, 3—5. 7. 8. 10): [1]) Name: ŚB. 8, 5, 1, 4. — [2]) $C_2$ S ॰शतँ, $M_2$ ॰शति. — [3]) N S $M_2$ ॰स्त्रिँश, $C_2$ ॰स्त्रिंश. — [7]) vgl. 6, 1, 7, 17. — [8]) vgl. 6, 2, 1, 17. — [9]) vgl. 6, 1, 8, 7. — [10]) zu lesen *saṁyānyāv*? vgl. 6, 1, 8, 9; Hss. वाचोपद॰; TS. 5, 3, 9, 1 nennt sie *kṛttikās* (vgl. TB. 3, 1, 4, 1). — [11]) Name: TS. 5, 3, 10, 2. —

त्विष्टका अप्ययेषु द्वे द्वे मध्ये च । ११ ॥ अधिद्यौर्नामासीत्यपरां मण्डलाम् । १२ । उत्तरतः पुरस्तात्स्वयमातृणाया ॥ अयँ सो अग्निरित्यष्टौ नानायजुष उपदधाति यथा गार्हपत्ये । १३ । पूर्वां पुनश्चितिँ ॥ येन ऋषयस्तपसा सत्रमासतेति मवतासामष्टाभिः । १४ ॥ समास्त्वाग्न ऋतवो वर्धयन्त्विति दश द्वे द्वे लोकेषु । १५ ॥ ऊर्ध्वा अस्य समिधो भवन्तीति द्वादशाप्रीरप्ययेषु तिस्रस्तिस्रः । १६ ॥ प्राणादपानँ संतन्विति नव संततीः पुरस्तात्प्रतीचीरुपदधाति । १७ ॥ ऋचा त्वा छन्दसा सादयामीतिप्रभृतिभिरप्ययेषु द्वे द्वे । १८ ॥ दूतँ वो विश्ववेदसमिति पञ्च लोकेषु । १९ ॥ इन्द्रो दधीचो अस्थभिरिति दश पूर्वार्धे । २० । छन्दश्चितीरुपदधात्यप्ययेषु तिस्रस्तिस्रो ऽन्तरा अन्तरा ॥ अयमग्निः सहस्रिण इति तिसृभिर्गायत्रीभिरँबोध्यग्निरिति त्रिष्टुब्भिर्जँनस्य गोपा इति जगतीभिः ॥ सँ समिदित्यनुष्टुब्भिरा ते अग्न इधीमहीति पङ्क्तिभिरेँना वो अग्निमिति बृहतीभिरँग्ने वाजस्य गोमत इत्युष्णिग्भिर्द्वे तिस्रः करोति

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥
भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
येना समत्सु सासहि ॥
येना समत्सु सासह्यव स्थिरा तनुहि भूरि शर्धताम् ।
वनेमा ते अभिष्टिभिः ॥

इति ककुब्भिः ॥ प्रेद्धो अग्न ॥ इमो अग्ने

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् ।
दूरेदृशं गृहपतिमथर्युम् ॥

इति विराड्भिरँग्ने तमद्येति पदपङ्क्तिभिरँग्निँ होतारं मन्य इति छन्दोभिरँग्ने त्वं नो अन्तमस्तं त्वा शोचिष्ठ दीदिवो ॥ ऽधा ह्यग्न इति द्विपदाभिरुत्तरार्धे । २१ । ॥ २ ॥

---

12) vgl. 6, 2, 1, 16. — 13) vgl. 6, 1, 5, 4. — 14) NSM$_2$ **येना**; statt **मवतासाम॰** (unbegreiflich): NS **त्यन्वातान॰**, M$_2$ **यत्वातान॰**; vgl. 6, 2, 6, 29. — 15) NSM$_2$ **॰स्त्वाग्ना**. — 17) vgl. Āp. Ś. 16, 32, 3. — 21) C$_2$ **छंदश्चतीरु॰**, **॰तरांतरा**, NSM$_2$ **॰तरामंतरा**; Hss. **त्रिष्टुभिर्ज॰**, **॰त्यनुष्टुभिरा**; NSM$_2$ **अग्ना**, **गोमता**; Mantras der *kakuds* vgl. MS. IV, 12, 5: 171, 9. 10, VS. 15, 38—40 mit ṚV. 8, 19, 19. 20; der *virājs* MS. II, 10, 6: 139, 5, IV, 10, 1: 143, 5. 6, KS. 39, 15: 132, 17. 18; der *dvipadās* MS. I, 5, 3: 69, 10; vgl. TS. 4, 4, 4, 8.

महाव्रतमुपदधात्यायाहि सुषुमा हि त इति तिसृभिः गायत्रीभिः शिरसि । रथन्तरं पक्षे ॥ ऽभि त्वा शूर नोनुम इति द्वे तिस्रस्कारं दक्षिणार्धे मध्ये ऽप्यये च । बृहदुत्तरस्मिँस्त्वामिद्धि हवामह इति द्वे तिस्रस्कारमुत्तरार्धे मध्ये ऽप्यये चात्मनि वामदेव्यं ॥ कया नश्चित्र आभुवदिति तिस्रो मध्ये । यज्ञायज्ञियं पुच्छे ॥ यज्ञा यज्ञा वो अग्नय इति द्वे तिस्रस्कारं पश्चार्धे मध्ये ऽप्यये च । १ ॥ यवा अयवा इति सप्त पूर्वार्धे । २ ॥ पृथिव्यसि जन्मनेतिप्रभृतिभिरप्ययेषु द्वे द्वे । ३ ॥ या देव्यसीष्टके कुमार्युपशीवरीतिप्रभृतिभिरप्ययेषु तिस्रस्तिस्रो ॥ या देव्यसीष्टक आयुर्दा इति नवस्वनुषजत्युपशीवरीत्युपरिष्टाद्वा देवीः स्थेष्टकाः सुशेवा इति मध्ये युगपत्तिस्रः । ४ ॥ सवयसे त्वेतिप्रभृतिभिरप्ययेषु तिस्रस्तिस्रः । ५ ॥ भूयस्कृदसीतिप्रभृतिभिरप्ययेषु पञ्चापञ्चीनाः प्रदक्षिणं पञ्च पञ्चोपदधाति । ६ ॥ ज्योतिष्मती त्वा सादयामीतिप्रभृतिभिरप्ययेषु तिस्रस्तिस्रो द्वे मध्ये । ७ ॥ कृत्तिका नक्षत्रमग्निर्देवतेतिप्रभृतिभिर्नक्षत्रेष्टकाः पुरस्तात्प्रतीचीरुपदधात्यग्ने रुचः स्थेति सर्वत्रानुषजति । पुरस्ताद्विशाखयोः

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय ।
यस्यां देवा अभि सँविशन्त उत्तमे नाक इह मादयध्वम् ॥

इति पौर्णमासीमुपरिष्टाद्भरणीनाम्

यत्ते देवा अदधुर्भागधेयममावास्ये सँविशन्तो महित्वा ।
सा नः प्रजां कृणुहि सर्ववीरे रयिं नो धेहि सुभगे सुवीरे ॥

इत्यमावास्याम् । ८ ॥ हिरण्यगर्भ इतिप्रभृतिभिरप्ययेषु द्वे द्वे । ९ ॥ स्वरसि स्वर्मे यच्छेति पूर्वां हिरण्येष्टकामृषभमुपधाय लोकंपृणया चितिँ संपूरयति । १० । स्वयमातृण्णाँ शर्करामश्वेनोपघ्राप्य ॥ स्वरित्यभिमन्त्रयते । ११ ॥ आयोष्ट्वा सदने सादयामीति सयजुषं करोति । १२ ॥ परमेष्ठी त्वा सादयत्विति पर्यायेणोपदधाति । १३ । नाचाविद्वान्न वरदानम् । १४ । अभिप्राण्यापान्य ॥ चितिं जुहोमीत्यदाभ्यातृणे ऽभिजुहोति । १५ ॥

---

3 (vgl. MS. II, 13, 9. 12. 15—20. 23; 8, 14; Āp. Ś. 17, 7—9. 6. 10): [1]) in $C_2$ fehlt: *ca bṛhad* bis zu dem dazugehörigen *'pyaye*; vgl. VS. 27, 35—42. — [4]) Hss. **नवस्वा॰**, NS in Margine: **पुरस्ता(द्)**; $NSM_2$ das zweite Mal *devyasīṣṭakā*. — [6]) MS. III, 5, 2. — [8]) $M_2$ **अस्यां** statt *yasyām*, $C_2$ **देवाभि**, Hss. **॰तोत्तमे**; *paurṇamāsīm* von mir eingefügt, $M_2$ **॰मिति उपरि॰**, $C_2$ NS **॰मित्युपरि॰**; Hss. **॰मावास्यायां**; Mantras vgl. TS. 3, 5, 1, 1. — [10–16]) vgl. 6, 2, 1, 10—16. — [10]) vgl. 6, 1, 8, 10. 11. — [15]) $C_2$ **॰प्राण्याव्यवान्य**, $NM_2$ **॰प्राण्यावान्य**; $NSM_2$ **॰दाभ्यस्तृ॰**. —

दिवमाक्रमिषमिति यजमानो जपति । १६ । वायव्यामुत्तराँ विकर्णीं शर्करां प्रतिप्रस्थाता ॥ प्रोथदश्वो न यवस इति मध्ये युगपत्स्वयमातृणालोकस्योपदधाति । १७ । व्याख्यातँ सार्वचितिकम् । १८ । पुरीषेण चितिँ सँस्थापयत्यन्यत्स्वयमातृणायाः । १९ । जानुदघ्नं प्रथमं चिन्वानश्चिन्वीतेति व्याख्यातम् । २० । ॥ ३ ॥

सौवर्णानाँ शकलानाँ सहस्रेण ॥ सहस्रस्य मासीतिप्रभृतिभिः सर्वमग्निं प्रोक्ष्य घृतेन प्रोक्षति ॥ वसवस्त्वा रुद्रैः पश्चात्पान्त्विति पश्चात्प्राङ्मुखो ॥ नितानस्त्वा मारुतो मरुद्भिरुत्तरतः पात्वित्युत्तरतो दक्षिणामुख ॥ आदित्यास्त्वा विश्वैर्देवैः पुरस्तात्पान्त्विति पुरस्तात्प्रत्यङ्मुखः ॥ पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्विति दक्षिणत उदङ्मुखो ॥ देवास्त्वेन्द्रज्येष्ठा वरुणराजानो ऽधस्ताच्चोपरिष्टाच्च पान्त्विति मध्ये प्राङ्मुखः । १ । प्रतिपरिक्रम्येमा मे अग्ना इष्टका धेनवः सन्त्विति दुहेनोत्तरं पुच्छाप्ययं प्रत्यारभ्य जपति । २ । यजमान उत्तरस्याँ श्रोणावन्त्यायामिष्टकायाँ शतरुद्रियं जुहोत्यर्कपर्णेनाजक्षीरं गवीधुकासक्तून्वा ॥ नमस्ते रुद्र मन्यव इतिप्रभृतिभिर्जानुदघ्ने धारयमाणो दक्षिणामुखो ॥ नमो बृहद्भ्यो ऽर्भकेभ्य इति नाभिदघ्न उदङ्मुखो ॥ नमो वास्तव्यायेत्यास्यदघ्ने प्राङ्मुखः । ३ । प्रत्यवरोहाज्जुहोति ॥ नमो अस्तु रुद्रेभ्यो ये दिवीत्यास्यदघ्न ॥ उत्तरेण पर्यायेण नाभिदघ्न ॥ उत्तमेन जानुदघ्ने । ४ । अर्कपर्णमसंचरे न्यस्येद्यं द्विष्यात्तस्य पशूनाँ संचरे न्यस्येत् । ५ ।

यो रुद्रो ऽप्सु यो ऽग्नौ य ओषधीषु ।
यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो ऽस्तु देवाय ॥

स्वाहेति तस्यामिष्टकायां गावीधुकं चरुमुपवपति । ६ । आयुधं तिसृधन्वमयाचितो ब्राह्मणाय दद्यात् । ७ ॥ अश्मन्नूर्जं पर्वते शिश्रियाणामित्युदकुम्भेनाग्निं प्रसव्यं त्रिः परि-

---

[16–17]) S **दिवमाक्रप्रतिप्रस्थाता**. — [17]) $M_2$ **शर्करां लोकस्यो॰**; MS. III, 3, 1: 32, 19; vgl. ŚB. 8, 7, 3, 9—12. — [18]) Hss. **॰चितिक्यं**, vgl. 6, 2, 1, 7. 20. 26. — [19]) $C_2$ S$M_2$ **॰त्यन्यस्व॰**. — [20]) MS. III, 3, 2: 34, 6—8.

4 (vgl. MS. II, 8, 14; 9, 2—9; 10, 1; III, 3, 4—6; Āp. Ś. 17, 10—13): [1]) vgl. TS. 5, 5, 9. — [2]) *pratiparikramya* vgl. z. B. 1, 7, 3, 30; $C_2$ **॰त्यूहेनो॰**, NS$M_2$ **उहेनो॰**; meine Emendation *duhena* grammatisch unrichtig für *dohena*. — [3]) vielleicht hat im Texte etwas wie *mṛgakṣīreṇa* gestanden: $C_2$ **॰पर्णेनमृत्स्मृशाम्यजक्षीरं**, NS **॰पर्णेनमृत्स्मृशांनाजाक्षीरं**; $M_2$ **॰पर्णेनाजाक्षीरं**, vgl. 6, 1, 2, 22, wo alle Hss. **॰जक्षी॰**; NS$M_2$ **गावी॰**, $C_2$ **गवे॰**, vgl. MS. II, 6, 6: 67, 10 und Mān. 9, 1, 1: *gāvīdhukaś caruḥ*; vgl. z. B. KS. 21, 6: 44, 13—17. — [4]) vgl. MS. III *pratyavahāram* und ŚB. 9, 1, 1, 32. — [6]) $C_2$ **गावे॰**, vgl. TS. 5, 5, 9, 3. — [7]) $C_2$ **तिस्रश्चेषून॰**, N **तिसृधेनूम॰**, S **तिसृघेनम॰**, $M_2$ **तिस्वधेनूम॰**, vgl. TS. 5, 5, 7, 2. —

षिञ्चन्पर्येति । निधाय त्रिरपरिषिञ्चन्प्रतिपर्येति । ८ । आग्नेयपावमान्याँ शिरसि गायत्रं गायोद्गाता । रथन्तरं दक्षिणे पक्षे । बृहदुत्तरस्मिन्नात्मनि वामदेव्यँ । यज्ञायज्ञियं पुच्छे । प्रजापतेर्हृदयमनृचं दक्षिणस्मिन्निकक्षे । स्तुतँ होतानुशँसति । ९ । परिगीतं नाक्रामेदा स्वयमातृण्णाया व्याघारणात् । १० । मण्डूकेनावकया वेतसशाखया च ॥ समुद्रस्य त्वावकया ॥ हिमस्य त्वा जरायुणेतिप्रभृतिभिः सप्तभिः सर्वमग्निँ विकर्षति । ११ । विनीय प्राणान्मण्डूकस्य विकर्षणमुत्करे प्रविध्यति । यं द्विष्यात्तमेतेनोपहन्यात् । १२ ॥ इष्टो यज्ञो भृगुभिरिति छन्दसां दोहँ यजमानँ वाचयति । १३ । औदुम्बरीर्घृते वासयति । १४ । आपराह्णिक्यौ प्रवर्ग्योपसदावुपेत्य वसन्ति । १५ । ऊर्ध्वं पूर्वाह्णिकीभ्यां कृष्णाजिनस्योपानहं प्रतिमुच्यापामिदं न्ययनं ॥ नमस्ते हरसे शोचिष इति द्वाभ्यामग्निमाक्रामति । १६ । पञ्चगृहीत आज्ये हिरण्यशकलमेकैकमवधाय ॥ द्रुषदे वडितिप्रभृतिभिः स्वयमातृण्णाँ व्याघारयति यथा नाभिम् । १७ ॥ स्वर्विदे वडित्यूर्ध्वाँ स्रुचमुद्गृह्णाति । १८ । दधनि मधुमिश्रे दर्भमुष्टिं पर्यासमन्नपते अन्नस्य नो देहीति तिसृभिः सर्वमग्निँ व्यवोक्षति । १९ ॥ प्राणदा अपानदा इति प्रत्यवरोहति । २० । आपराह्णिकी सद्यः सँस्थाप्योत्साद्य घर्मपात्राण्यग्नीषोमीयायौपसदं बर्हिस्तद्व्याख्यातम् । २१ । ॥ ४ ॥

॥ अग्निस्तिग्मेन शोचिषेति चतुर्गृहीतं जुहोति । १ । तूष्णीं षोडशगृहीतं गृहीत्वा ॥ य इमा विश्वा भुवनानीत्यष्टौ निगद्यार्धं जुहोत्युत्तरमनुवाकं निगद्य शेषम् । २ । औदुम्बरीर्घृतोषितास्तिस्रः समिध ॥ उदेनमुत्तरं नयेति तिसृभिः स्वाहाकारान्ताभिरादधाति । ३ । व्याख्यातमग्निप्रणयनम् । ४ ॥ उदु त्वा विश्वे देवा इत्यग्निमादत्ते । ५ ॥ पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरित्युत्तरतः पृष्ठ्यादेशस्य षड्भिराग्नीध्रायन्ति । ६ । प्रणीयमानस्योत्तरतो यजमानो व्रजति । दक्षिणतो ब्रह्मांशुः शिशान इत्यप्रतिरथं दशर्चमन्वाह । ७ ॥ विमान एष दिवो मध्य आस्त इति द्वाभ्यामुपदधात्याग्नीध्रीये ऽश्मानमुपधानवेलायाम् । ८ ॥

---

8) $C_2$ S $M_2$ **निधायं**, vgl. 6, 1, 5, 20. — 9) N S $M_2$ **गायत्रेणोद्गाता**; verdorbene Überlieferung, viell. aus **गायत्युद्गाता**; *nikakṣe* ŚB. 9, 1, 2, 40. — 10) 6, 2, 4, 17. 11) N S $M_2$ **°नावकायाँ**. — 12) vgl. KS, 21, 7: 46, 9. 10. — 13) vgl. MS. I, 4, 5: 53, 13. 14; II, 12, 3: 147, 3. 4. — 14) vgl. ŚB. 9, 2, 2, 7. — 16) vgl. KS. 21, 7: 46, 12—20 und TS. 5, 4, 4, 4. — 17) $C_2$ **°मवधायं**; S $M_2$ **वेडिति°**, N **वे इति°**; vgl. 6, 1, 7, 5. — 18) $M_2$ **वेडि°**; vgl. 1, 7, 3, 32. — 19) $C_2$ **पर्यासात्रपते**, N S $M_2$ **पर्यासन्नन्नपते**. — 20) Hss. **°रोहयत्या°**. — 21) vgl. 2, 2, 2, 1. 2.

5 (vgl. MS. II, 10, 2—12, 3; III, 3, 7—4, 3; Āp. Ś. 17, 13—20): 1) ŚB. 9, 2, 2, 5 *pañcagṛhītam*. — 3) vgl. 6, 2, 4, 14. — 4) 2, 2, 2, 4—8 und 1, 7, 3, 33 flgg. — 3—7) Reihenfolge wie TS. 5, 4, 6. — 8) KS. 21, 8; ŚB. 9, 2, 3, 15. —

सुम्नहूर्यज्ञ आ च वक्षदिति चतुर्भिराहवनीयाद्यन्ति । ९ ॥ क्रमध्वमग्निनेति पञ्चभिरग्नि-
माक्रामति । १० । कृष्णायाः श्वेतवत्सायाः पयसः पूर्णामौदुम्बरीं ॥ नक्तोषासाग्ने सह-
स्राक्षेति निगद्य स्वयमातृण्णामभिजुहोति । ११ । तस्याँ संभारान्हिरण्यशकलं च न्युप्य ॥
सुपर्णो ऽसि गरुत्मान्पृष्ठे पृथिव्याः सीद ॥ आजुह्वानः सुप्रतीक इति द्वाभ्यामग्निँ सादयित्वा ।
समिध्य समिध आदधाति ॥ ताँ सवितुर्वरेण्यस्येति शमीमयौ ॥ विधेम ते परमे जन्मन्नग्न
इत्याश्वत्थीं । प्रेद्धो अग्न इति वैकङ्कतीम् । १२ ॥ अग्ने तमद्येति पङ्क्त्या जुहोति ॥ सप्त
ते अग्ने समिध इति पूर्णाहुतिं ॥ चितिं जुहोमीत्यनुवाकशेषेण द्वितीयाम् । १३ । अग्नये
वैश्वानराय द्वादशकपालं निर्वपेत् । १४ । स्रुवं जुहूं च संमृज्याभ्युदाहरति वैश्वानरी-
यम् । १५ । सकृत्सर्वमवद्यति । १६ । आशयस्यान्वासिच्य द्विरभिघार्योपाँश्वग्नये वैश्वा-
नरायानुब्रूहीत्यनुवाचयति । १७ । आश्राव्याग्निँ वैश्वानरँ यजेति प्रेष्यति । १८ । वषट्कृते
मध्ये पाणिना जुहोत्यृजुं प्रतिष्ठितम् । १९ । आशयेनाभिजुहोति । २० । यदि पर्या-
वर्तेत ब्राह्मणव्याख्यातम् । २१ । पुरोडाशान्सप्त सप्तकपालान्तूष्णीमुपचरितान्सँस्करोति । २२ ।
उपस्तरणाभिघारणैः संपातं मारुतैर्गणैर्जुहोति ॥ शुक्रज्योतिश्च चित्रज्योतिश्चेतिप्रभृतिभिर्द-
क्षिणार्धे पूर्वार्धे ॥ ऋतजिच्च सत्यजिच्चेति दक्षिणार्धे ॥ ऋतश्च सत्यश्चेति दक्षिणार्धे पश्चार्धे ॥
ऽरण्येऽधीतेन गणेन पश्चार्धे ॥ ईदृङ् चैतादृङ् चेत्युत्तरार्धे पश्चार्धे ॥ ईदृक्षास एतादृक्षा-
सेत्युत्तरार्धे ॥ सभरसो मरुतो यज्ञ इत्युत्तरार्धे पूर्वार्धे । २३ । वसोर्धारायै स्रुचमौदु-
म्बरीं महतीं स्योनदण्डां कारयेद्यथा वैश्वानरीये धारा प्रतिष्ठास्यति तथावस्थापयेत् । २४ ।
तूष्णीं द्वादशानि गृहीत्वान्वारब्धे यजमाने वाचयन्वाजश्च मे प्रसवश्च म इतिप्रभृतिभिः
पञ्चभिरनुवाकैः संततँ वसोर्धारां जुहोति । २५ ॥ एका च तिस्रश्चेत्या त्रयस्त्रिँशतश्चतस्र-
श्चाष्टौ चेत्यॅष्टाचत्वारिँशतस्त्र्यविश्च त्र्यवी चेति यथाम्नातं ॥ धेनुश्चानड्वाँश्चायुर्यज्ञेन कल्पते ॥
प्राणो यज्ञेन कल्पत इतिप्रभृतिभिः ॥ पतये ऽधिपतय इत्यन्तेन ॥ स्तोमश्च यजुश्चेति यथा-
म्नातमन्ततः स्वाहाकारं कुर्यात् । २६ । स्रुचमनुप्रहृत्याज्यात्शेषे चतुःशरावं जीवतण्डुल-
मोदनं पक्त्वा मध्यतःकारिभ्यो दद्यात्तेभ्यश्चतस्रश्चतस्रो धेनूः । २७ । ओषधीरारण्या ग्राम्याश्च
सर्पिषा सँसृज्य वाजप्रसव्यमौदुम्बरेण स्रुवेण जुहोत्यग्ने अच्छा वदेह न इत्यष्टाभिर्विश्वे नो
अद्य मरुत इति षड्भिः । २८ । हुत्वा हुत्वा पात्र्याँ संपातमवनयति । २९ । दक्षिणस्याः

---

[12]) $C_2$ **समिंध्य**; *sīda ājuhvānaḥ* so mit vernachlässigtem Sandhi die Hss.; vgl. ŚB. 9, 2, 3, 37—40. — [14–26]) $C_2$ fehlt: *nirvapet* bis *cāyur ya.* — [15]) S **जुहूं**. [16–19]) vgl. 1, 3, 1. 2 und BŚ. 10, 52 : 55. — [17]) SN **॰त्वासयस्या॰**, $M_2$ **॰त्वाशयष्या॰**. — [22]) $M_2$ einmal *sapta.* — [24]) $M_2$ **स्योनादंडान्का॰**, NS **स्योनादंडान्का॰**. — [26]) MS. I, 11, 3 : 163, 13—164, 3. — [27]) $C_2$ **॰त्षशेषे**, N **॰त्सेषे**, S **॰त्सैष**, $M_2$ **॰त्स**; $M_2$ **तेभ्यश्चतस्रो**; vgl. TS. 5, 7, 3, 4. — [28]) MS. I, 11, 4. —

श्रोणेः पश्चादग्निपुच्छस्य वासन्द्यां कृष्णाजिनमास्तीर्य ॥ बस्ताजिनं पशुकामस्य ॥ तस्यामासीनं ॥ देवस्य त्वा सवितुः प्रसव इति संपातेनाभिषिञ्चति । ३० । शिरसो ऽध्या मुखादवस्रावयति ॥ बृहस्पतिँ साम्राज्यायेति ब्राह्मणमिन्द्रँ साम्राज्यायेति राजन्यमग्निँ साम्राज्यायेति वैश्यं । न वाभिषिञ्चेद्वैश्यम् । ३१ । द्वादशगृहीतेन द्वादश राष्ट्रभृतो जुहोत्यृताषाडृतधामेतिप्रभृतयः पर्यायास्तेषामेकैकेन पर्यायेणाहुती द्वे द्वे ॥ तस्मै स्वाहा वडिति पूर्वां ॥ ताभ्यः स्वाहा वडित्युत्तरां ॥ स न इदं ब्रह्म क्षत्रं पात्विति सर्वत्रानुषजति ॥ ता न इदं ब्रह्म क्षत्रं पान्त्विति च ॥ बृहस्पतिर्विश्वकर्मेति द्वादशो ब्राह्मणस्य ॥ प्रजापतिः परमेष्ठीति राजन्यस्यामृदयो दूरेहेतिरिति वैश्यस्य । ३२ । द्विर्गृहीतेन ॥ स नो भुवनस्य पत इति रथशिरस्यध्याहवनीये हुत्वा तमध्वर्यवे दक्षिणाकाले दद्यात् । ३३ ॥ समुद्रो ऽसि नभस्वानार्द्रदानुरितिप्रभृतिभिरञ्जलिना त्रिर्वातं जुहोति कृष्णाजिनपुटेन वा । ३४ । ॥ ५ ॥

पदलोभनप्रभृति सिद्धमा धिष्ण्यनिवपनात् । १ । वैहवीभिर्धिष्ण्येषूपदधात्यश्मनवमा आग्नीध्र ॥ एकविँशतिँ होत्र्य ॥ एकादश ब्राह्मणाच्छँस्ये ॥ ऽष्टाष्टा इतरेषु ॥ षण्मार्जालीये पशुश्रपणे च । २ । सिद्धमाग्नीषोमीयात् । ३ ॥ अग्नये गायत्राय त्रिवृते राथन्तरायेति दशहविषँ सर्वपृष्ठामग्नीषोमीयस्य पशुपुरोडाशमनुनिर्वपति । ४ । यथा देविकाहविर्भिस्तथा प्रचरति । ५ । सिद्ध उपवसथः । ६ । श्वो भूते ऽग्निष्टोम उक्थ्यो ऽतिरात्रो वा । ७ । सिद्धमा परिधीनां परिधानात् । ८ । आघारसमिधमाधायाग्निँ युनज्मि शवसा घृतेनेत्यग्नियोगं जुहोति । ९ ॥ इमौ ते पक्षाविन्दुर्दक्ष इति पक्षावभिमृशति । १० ॥ स्वयं कृण्वान इति पञ्चभिरन्वारोहाञ्जुहोति । ११ । सिद्धमोपाकरणात् । १२ । एकयूप ऐकादशिनानुपाकरोति क्रतुपशून्वा । १३ । सिद्धमा दक्षिणाकालात् । १४ । सौवर्णं शतमानँ स्थालं मधुनः पूर्णं दक्षिणाभिः सहातिहृत्य ॥ चित्रं देवानामिति यजमानो ऽवेक्ष्य ब्रह्मणे प्रयच्छति । १५ । सिद्धमाग्निष्टोमचमसेभ्यः । १६ । अग्निष्टोमचमसानुन्नीय ॥ दिवो

---

[30]) vgl. Ś́B. 9, 3, 4, 10—16. — [31]) die letzte Formel nur hier; vgl. TS. 5, 6, 3. — [32]) S $M_2$ fehlt *ca*; MS. III *ṣaḍbhir*, vgl. ŚB. 9, 4, 1, 5. — [33]) vgl. ŚB. 9, 4, 1, 14; 2, 11.

**6** (vgl. MS. II, 12, 3–4; III, 4, 4. 5. 7. 8; Āp. Ś. 17, 20—26): [1]) $C_2$ **धिष्णि॰**, N S $M_2$ **धिष्ण्या॰**; 2, 2, 2, 5—4, 3. — [2]) Hss. **॰नवमाग्नीध्र**; N S $M_2$ **॰शति होत्र्या**; Mān. 2, 2, 4, 4; 2, 3, 6, 13 **होत्रीय॰**; $C_2$ **॰णात्शि ॥ सिने**, N S **॰णान्शँसिने**, $M_2$ **॰णान्सँशिने**; *vaihavībhir*: MS. I, 4, 1; *paśuśrapaṇa* vgl. KS. 22, 11. — [3]) 2, 2, 4, 11—13. — [4]) MS. III, 15, 10. — [5]) vgl. 2, 5, 5, 11 flgg. — [6]) 2, 2, 5, 8—35. — [7]) Hss. **अग्नि॰**. — [8]) 2, 3, 1, 1—11. — [10]) vgl. TS. 5, 4, 10, 2. — [11]) MS. II, 13, 22; III, 5, 5. — [12]) 2, 3, 1, 13—6, 15. — [13]) Hss. **एकाद॰**. — [14]) 2, 3, 6, 16—2, 4, 5, 4. — [15]) KS. 22, 8: 64, 19—22. — [16]) 2, 4, 5, 18—2, 5, 2, 16. —

मूर्धासीत्यप्सुमतीभ्यामग्निँ संमृशति । १७ । सिद्धमा शँयोर्वाकात् । १८ ॥ वि ते मुञ्चामि रशनाँ वि रश्मीनिति परिधिविमोकं जपति । १९ । शँय्वन्ते सँस्थिते

इमँ स्तनं मधुमन्तं धयापां प्रपीनमग्ने सलिलस्य मध्ये ।
उत्सं जुषस्व मधुमन्तमूर्मिँ समुद्रियँ सलिलमा विशस्व ॥

इत्यग्निविमोकं जपति । २० । सिद्धमानूबन्ध्यायाः । २१ । प्राक्समिष्टयजुर्भ्यो ॥ यास्ते अग्ने सूर्ये रुचो ॥ या वो देवाः सूर्ये रुचो ॥ रुचं नो धेहीति स्रुचं जुहोति । २२ ॥ तत्त्वा यामीति वारुण्या प्राग्वेदिपर्योषणाद्दधिघृते सँसृज्य ॥ समीची नामासीति पर्यायैरभिजुहोति प्रतिदिशं द्वाभ्यां मध्ये । २३ । सँस्थाप्योदवसानीयां ॥ दीक्षया त्वापं तपसा त्वापँ सुत्यया त्वापमवभृथेन त्वापँ वशया त्वापमिति प्रयास्यन्नाप्तिभिरैष्टकमग्निमुपतिष्ठते । २४ । अग्निचित्सँवत्सरं न प्रत्यवरोहेन्न प्रत्युत्तिष्ठेद्यावज्जीवँ वर्षति न धावेत्पक्षिणः शिरसो नाश्नीयान्न रामामुपेयाद्द्वितीयं चित्वा नान्यस्य भार्यां । तृतीयं चित्वा न कांचन । यद्युपेयान्मैत्रावरुण्यामिक्षया यजेत । २५ ।

ये अग्नयः पुरीषिण आविष्टाः पृथिवीमनु ।
तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ॥

इति प्रवासादेत्यैष्टकमग्निमुपतिष्ठत ॥ उप त्वाग्ने दिवे दिव इति तृचेनान्येषाम् । २६ । अग्निं चित्वैष्टिक्या सौत्रामण्या यजेत । २७ । पुनश्चितिस्तिस्रश्चितयः । २८ ॥ येन ऋषयस्तपसा सत्रमासतेत्यष्टौ नानायजुष उपधायाष्टौ लोकंपृणाः पुरीषेण चितिँ संछादयत्येकादश द्वितीयस्यां । द्वादश तृतीयस्याम् । २९ । सोमेन यजमान ऋद्धिकामः पुरा चिते पुनश्चितिं चिन्वीत । चित्वा वा व्याघारमाणो व्याघारितायामुत्तरवेदौ । ३० । येष्वग्निर्न संभवेत्तेषु पुनश्चितिमेँथँ सो अग्निरित्यष्टौ नानायजुषस्त्रयोदश लोकंपृणास्ता एकविँशतिः । ३१ ॥ अयं ते योनिर्ऋत्विय इत्यग्निं निदधाति निदधाति । ३२ । ॥ ६ ॥

॥ इति चयने द्वितीयो ऽध्यायः ॥

॥ इति मानवसूत्रे चयनकल्पः समाप्तः ॥

---

18) 2, 4, 5, 19—2, 5, 5, 4. — 19) N S $M_2$ परिवि॰; vgl. 1, 4, 2, 20. — 20) N S $M_2$ प्रपीतम॰; TS. 5, 5, 10, 6. 7. — 21) 2, 5, 5, 5. 22) vgl. 6, 1, 7, 15; 2, 5, 4, 16. — 23) MS. II, 13, 21; 2, 5, 5, 18; vgl. TS. 5, 5, 10, 5. — 24) N S $M_2$ ॰सानीयं; $C_2$ प्रवसंत्रापुभिरै॰, S प्रयास्यनिताभिर॰, N प्रयस्यन्नामीभिरै॰, $M_2$ प्रयत्नाधिभिरै॰; 2, 5, 5, 23—26; KS. 22, 8: 65, 1—4. — 25) vgl. KS. 21, 12: 52, 15. TS. 5, 5, 4, 2. 3; 5, 6, 8, 3. 4; 5, 7, 6, 1. — 26) N S $M_2$ इत्यृचे॰; KS. 22, 10: 67, 1—4. — 27) vgl. ŚB. 12, 8, 2, 2. — 28) vgl. KS. 22, 2: 58, 14. — 29) N S $M_2$ येना; vgl. 6, 2, 2, 14. — 30) N S $M_2$ *yajamāna* fehlt; NS$M_2$ व्याघारितामु॰. — 31) so meine Konjektur, Hss. ॰पृणाः सा एकविँशत्य॰.

# STELLINGEN

I Garbe (Āp. Śr. S. III, pag. XXII—XXIV) ziet over het hoofd, dat het onbekend is, of het Śrauta-Sūtra der Mānavas ouder is dan dat der Āpastambins of omgekeerd.

II Het Cayana maakt niet het zesde boek van het Mānava-Śrauta-Sūtra uit.

III Maitr. S. III, 5, 3 : 58, 14
*atha yañ śarkarā apariśritya sikatā nivapati retasaḥ siktasya parigṛhītyai.*
l.: *śarkarāḥ pariśritya.*

IV Maitr. S. III, 4, 1 : 45, 13
*ardhyo vā ahaṃ devatānām asāni.*
l.: *ardho.*

V Oldenberg (Rel. des Veda[2] pag. 234—37) geeft een eenzijdig beeld van Pūṣan.

VI Vergelijking van het onderlinge verband van talen met verwantschapsverhoudingen van levende wezens werkt misleidend (vgl. bv. Jespersen, Origin of linguistic species, Scientia 1909).

VII Wil men trachten te benaderen hoe taal ontstaan is, dan doet men beter den ontwikkelingsgang van taal en mensch te bestudeeren, dan te philosopheeren over het oorsprongsmoment alleen, welks belang men dan bovendien allicht overschat.

VIII Meillet (Le problème de la parenté des langues, Scientia 1914) zegt o. a. pag. 413 te onrechte: „ce qui s'emprunte, ce sont esentiellement des éléments de vocabulaire".

IX Reeds uit den naam „Suppletivwesen“ blijkt, dat Osthoff niet op de kern van dit verschijnsel den hoofdnadruk legt.

X Lévy-Bruhl (Les fonctions mentales dans les sociétés inférieures) maakt een te groote scheiding tusschen de mentaliteit van primitieve en van beschaafde volken.

XI Trautmann (Altpr. Sprachd. pag. 283) verwart bij de modi den Oudpruisischen met den Indogermaanschen toestand

XII Hoops (Reallexicon des Germanischen Altertums) geeft een onjuiste beteekenisgeschiedenis van *guþ*.

XIII Het is beter „Hymiskviþa 5³“ te lezen *á móþorfaþer* dan *á mínn avi* (F. Jónsson).

XIV Seghelijn van Jherusalem

1429 So dat hi smeesters bande brac,  
Ende metten rechteren voete stac  
Sinen meester voer sijn *borste,*  
Dat hi voer hem ter eerde *storte*  
l.: *herte* — *sterte.*

4145 Ende of ghi spise hebbet vri,  
Draechse daer, des bid ic *u,*  
l.: *di.*

5847 So bid ic u dat ghi mi sent  
Meere pine ende torment,  
Dat ic mine misdaet gheboete  
Ende *ic u* gheboeren moete.  
l.: Ende *mi* gheboeren moete  
Dat ic mine misdaet gheboete.

XV Walewein

4646 *Die joncfrouwe* andworde:  
l.: *Der joncfrouwen oom.*

XVI J. Koopmans (Lett. Studiën pag. 4) zegt te onrechte: „er komt in eens een geheel andere koers in 't stuk;“ (nl. in de Baeto van Hooft).

U
19